CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ ॥ दक्षहरास्तोत्रं समाप्तम् ॥ ॥ ःः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

ग॰रा॰ स्वस्ति श्री श्रीगणेशाय नमः॥ चतुर्भुजां त्रिनेत्रां च सर्वावयवशोभितां॥ रत्नकुंभसितांभोजवरदाभ
२ यसत्करां॥१॥ श्वेतवस्त्रपरीधानां मुक्तामणिविभूषितां॥ एवं ध्यायेत्सुसौम्यां च चंद्रायुतसम
प्रभाम्॥॥२॥ चामरैर्वीज्यमानां च श्वेतछत्रोपशोभितां॥ सुप्रसन्नां च वरदां करुणार्द्रनिरंतरां
॥३॥ सुधाप्लावितभूपृष्ठां दिव्यगंधानुलेपनाम्॥ त्रैलोक्यनमितां गंगां सर्वैर्देवैरभिष्टुतां॥४॥ दिव्य
रत्नविभूषां च दिव्यमाल्यानुलेपनाम्॥ ध्यात्वा जले यथा प्रोक्तं तथावीर्यां च पूजयेत्॥५॥ ॐ नमो
१ भगवत्यै ऐं ह्रीं क्लीं हिलि २ मिलि २ गंगे मां पावय २ स्वाहा॥ अनेनैव तु मंत्रेण पंचपुष्पाञ्जलिं
श्री गंगायै निवेदयेत्॥ माल्यादिभिः॥१॥ दशांगं गुग्गुलं धूपं॥२॥ गृहाण मंगलं दीपं॥३॥ रुद्ररू
पे नमस्तेस्तु गृहाण वरदा भव॥ परदारपरद्रव्यपरद्रोहपराङ्मुखः॥ गंगा ब्रूते कदा गत्वा मा
मयं पावयिष्यति॥ इति श्रीवैश्वानरसंवादे दशपापहरायाः श्रीगंगाध्यानार्चनविधिः॥ एवं
ध्यानार्चनं विधाय पश्चात् जलान्तःस्थितो ज्येष्ठमासि सिते पक्षे प्रतिपदादिदशमीपर्यं

नारद

छ त व त्रिं समन्वितं॥४ राम:

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

॥ॐ [illegible]॥ CC-0. Digitized by eGangotri and MIDF- Delhi

तं दशविधपापप्रणाशनार्थं प्रतिदिनमुत्तरोत्तरैर्दिनवृद्ध्या स्तोत्रपाठमहं करिष्ये॥ अ
स्य श्रीदशहरा स्तोत्रमंत्रस्य ब्रह्मा ऋषिः अनुष्टुप् छंदः श्रीदशपापहरा गंगा देवता मम
समस्तपापक्षयार्थे जपे विनियोगः॥ ॐ नमः शिवायै गंगायै शिवदायै नमो नमः॥ नमस्ते वि
ष्णुरूपायै ब्रह्ममूर्त्यै नमो नमः॥१॥ नमस्ते रुद्ररूपिण्यै शांकर्यै ते नमो नमः॥ सर्वदेवस्वरू
पिण्यै नमो भेषजमूर्त्तये॥२॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमो नमः॥ स्थास्नु
जंगमसंभूतविषहंत्र्यै नमो नमः॥३॥ संसारविषनाशिन्यै जीवनायै नमोस्तु ते॥ तापत्रितय
संहंत्र्यै प्राणेश्यै ते नमो नमः॥४॥ शांतिसंतानकारिण्यै नमस्ते शुद्धमूर्त्तये॥ सर्वसंशुद्धिका
रिण्यै नमः पापारिमूर्त्तये॥५॥ भुक्तिमुक्तिप्रदायिन्यै भद्रदायै नमोस्तु ते॥ भोगोपभो
गदायिन्यै भोगवत्यै नमोस्तु ते॥६॥ मंदाकिन्यै नमस्तेस्तु स्वर्गदायै नमो नमः॥ नमः त्रै

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तो. लोकयभूषायै त्रिपथायै नमो नमः ॥७॥ नमस्त्रिशुक्लसंस्थायै क्षमावत्यै नमोस्तु
ते ॥ त्रिहुताशनसंस्थायै तेजोवत्यै नमो नमः ॥ ८ ॥ नंदायै लिंगधारिण्यै सुधाधारात्म
ने नमः ॥ नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥९॥ बृहत्यै ते नमस्तेस्तु लोकधात्र्यै
नमो नमः ॥ नमस्ते विश्वमित्रायै नंदिन्यै ते नमो नमः ॥१०॥ पृथ्व्यै शिवामृतायै च
२ सुवृषायै नमोस्तु ते ॥ परापरशताढ्यायै तारायै ते नमो नमः ॥११॥ पाशजालनिकृं
तिन्यै अभिन्नायै नमो नमः ॥ शांतायै च वरिष्ठायै वरदायै नमो नमः ॥१२॥ उग्रायै सु २
खसंसेव्यै संजीविन्यै नमो नमः ॥ ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः ॥१३॥
प्रणतार्त्तिप्रभंजिन्यै जगंमात्रे नमो नमः ॥ सर्वापत्प्रतिपक्षायै मंगलायै नमो
नमः ॥१४॥ शरणागतदीनार्त्तपरित्राणपरायणे ॥ सर्वस्यार्त्ति हरे देवी नारायणी गंगो
१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमोस्तुते ॥१५॥ निर्लेपायै दुर्गहंत्र्यै दक्षायै ते नमो नमः॥ परापरपरायै च नमो नि
र्वाणदायिनी ॥१६॥ गंगे ममाग्रतो भूया गंगे मे देवि पृष्ठतः॥ गंगे मे पार्श्वयोरेधि
गंगे त्वय्यस्तु मे स्थितिः॥१७॥ आदावंते च मध्ये च सर्वं त्वं गां गते शिवे॥ त्वमेव मूल
प्रकृतिस्त्वं हि नारायणः परं ॥१८॥ गंगे त्वं परमात्मा च शिवस्वरूपं नमः शिवे॥ यइदं पठते स्तोत्रं शृणु
यात्कृद्धयान्वितः॥ दशधा मुच्यते पापैः कायवाक्चित्तसंभवैः॥१९॥ रोगस्थो मुच्यते रोगा
द्विपद्भ्यश्च विपद्युतः॥ मुच्यते बंधनाद्बद्धो भीतो भीतेः प्रमुच्यते॥२०॥ सर्वान्कामान
वाप्नोति मृतस्त्रिदिवं व्रजेत्॥ दिव्यं विमानमारूढः दिव्यस्त्रीपरिवीजितं॥२१॥ गृहेपि
लिखितं यस्य सदा तिष्ठति धारितं॥ नाग्निचौरभयं तस्य न सर्पादिभयं क्वचित्॥२२
तस्यादशम्यामेतच्च स्तोत्रं गंगाजले स्थितः॥ यः पठेद्दशकृत्वस्तु दरिद्रो वापि वाप्स

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द॰रा॰ मः॥ २३॥ तत्कोटि सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः॥ पूर्वोक्तेन विधानेन यत्फ
लं संप्रकीर्त्तितं॥ २४॥ यथा गौरी तथा गंगा तस्माद्गौर्यास्तु पूजने॥ यो विधिर्विहितः सम्यक् सोपि
३ गंगाप्रपूजने॥ २५॥ यथा हरस्तथा विष्णुर्यथा हरिस्तथोमा॥ उमा यथा तथा गंगा चतु
रूपं न भिद्यते॥ २६॥ विष्णुरुद्रान्तरं चैव श्रीगौर्योरन्तरं तथा॥ गंगागौर्यान्तरं चैव यो ब्रू
ते मूढधीस्तु सः॥ २७॥ रौरवादिषु घोरेषु नरकेषु पतत्यधः॥ अदत्तानामुपादा
नं हिंसा चैवाविधानतः॥ २८॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतं॥ पारुष्य
३ मनृतं चैव पैशुन्यं चापि सर्वशः॥ २९॥ असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्वि
धं॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं॥ ३०॥ वितथाभिनिवेशश्च मान ३
सं त्रिविधं स्मृतं॥ एतानि दशपापानि हर त्वं मम जाह्नवि॥ ३१॥ दशपा रामः
३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पहराय तस्मात्स्मर्तृदशहरा स्मृता ॥ एतैर्दशविधैः पापैः कोटिजन्मसमुद्भवैः ॥३२॥ मुच्यते नात्र संदेहो
ब्रह्मणो वचनं यथा दशरात्रिंशद्धृता स वीपितृन् अथ पितामहान् ॥३३॥ उद्धरत्येव संसारान्मंत्रेणानेन पू
जयेत् ॥ ॐ नमो भगवत्यै दशपापहरायै गंगायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वायै
वकृत्यै विश्वमुख्यायै नंदिन्यै ते नमो नमः ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ॥३४॥ गरानंदे
व्यतिपाते कन्याचंद्रवृषे रवौ ॥ दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥३५॥ सितमकरनिःषण्णां शुभ्रव
र्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलाभीत्यभीष्टां ॥ विधिहरिहररूपां सेंदुकोटीरजूटां कलितसि
तदुकूलां जाह्नवीं तां नमामि ॥३६॥ आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्पन्नगशा
यिनो भगवतः पादोदकं पावनं ॥ भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्म
षनाशिनी भगवती भागीरथी दृश्यते ॥३७॥ विष्णुपादा[illegible]ज संभूते गंगे त्रिपथगामिनि ॥ धर्म
द्रवेति विख्याता पापं मे हर जाह्नवि ॥३८॥ जाह्नवी सर्वतः पुण्या ब्रह्महत्यापापहारिणी ॥ वाराणा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द.ह. स्यां विशेषेरा गंगा चोत्तरवाहिनी ॥ ॥३५॥ इति दशहरास्तोत्रं संपूर्णं शुभम् ॥ संवत् ॥
४ १८६६ साल मिति चैत्र वदि ८ रोज ५ लिषितं शिवनारायणेन ॥ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi